## अपचितश्च । (३०/३०७१)

अपचितः इति वा निपात्यते । अपपूर्वस्य चायतेः निष्ठायाम् अनिट्त्वं चिभावश्च निपात्यते । अपचितोऽनेन गुरुः, अपचायितोऽनेन गुरुः[1] ।

[८३४] क्तिनि नित्यमिति वक्तव्यम् । (म.भा. ३.२९०)

[2]क्तिनि नित्यं चिभावो[3] निपात्यते । अपचितिः ॥

## हु ह्वरेश्छन्दसि । (३१/३६७९)

ह्वरतेः धातोर्निष्ठायां छन्दसि[4] हु इत्ययमादेशो भवति । हुतस्य चाहुतस्य च । 'अहुतमसि हविर्धानम्' (वा.सं. १.७) । छन्दसि इति किम् ? ह्वृतम् ॥

## अपरिह्वृताश्च । (३२/३६८०)

अपरिह्वृताः इति निपात्यते छन्दसि विषये । [5]हु इत्येतस्यादेशस्याभावो निपात्यते । 'अपरिह्वृताः [6]सनुयाम वाजम्[7]' (ऋ. १.१००.१९) ॥

## सोमे ह्वरितः । (३३/३६८१)

ह्वरितः इति ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते [8]छन्दसि विषये, सोमश्चेद् [9]भवति । मा नः[10] सोमो ह्वरितः । विह्वरितस्त्वम् ॥

## ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च । (३४/३६८२)

ग्रसित स्कभित स्तभित उत्तभित चत्त विकस्त विशस्तृ शंस्तृ शास्तृ तरुतृ तरूतृ वरुतृ वरूतृ वरूत्रीः उज्ज्वलिति क्षरिति क्षमिति वमिति अमिति इत्येतानि[11] छन्दसि विषये निपात्यन्ते । तत्र ग्रसित स्कभित स्तभित उत्तभित इति ग्रसु स्कम्भु स्तम्भु इत्येतेषाम् उदित्त्वान् निष्ठायाम् इट्प्रतिषेधे प्राप्ते इडागमो निपात्यते । 'ग्रसितं वा एतत् सोमस्य' (मै. ३.७.४) । ग्रस्तम् इति भाषायाम् । स्कभित – '[12]विष्कभिते अजरे' (ऋ. ६.७०.१) । विष्कब्ध इति भाषायाम् । स्तभित – '[13]येन स्वः स्तभितम्' (ऋ. १०.१२१.५) । स्तब्धम् इति भाषायाम् । उत्तभित – 'सत्येनो[14]त्तभिता भूमिः' (ऋ.१०.८५.१) । उत्तब्धा इति भाषायाम् । उत्तभिता इति उत्पूर्वस्य [15]निपातसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति ।

---

1. पूजितः इत्यर्थः इत्यधिकम् क. 2. वाक्यमिदम् नास्ति ह. 3. वक्तव्यः ई. 4. विषये इत्यधिकम् इ. 5. नञ्परिपूर्वस्य ह्वरतेः निष्ठायां ह्रु इत्ययमादेशो भवति । तस्यादेशस्याभावो निपात्यते इत्यधिकम् क. 6. सनुयाम नास्ति क. 7. अग्ने इत्यधिकम् ह. 8. छन्दसि विषये नास्ति ड. 9. तत् इत्यधिकम् ई, अभिधेयो भवति इत्यधिकम् ह. 10. मा नः सोम ह्वरितो विह्वरस्त्व ड. मा.श्रौ. (2.5.4.24) 11. शब्दरूपाणि इत्यधिकम् क. 12. स्कभितो रक्षति क. 13. स्कभिती येन क. 14. उत्तम्भितोऽग्निः क. 15. निपातनात् अन्यपूर्वस्य न भवति क.